ऽप्रसिद्धत्वात् नैवात्मानमनात्मनि आत्मनोऽप्रसिद्धत्वात्। अध्यारोपयामीत्यसंबन्धः। प्रसिद्धस्यैव प्रसिद्धान्तरेऽध्यासः। तस्य संस्का
रे समुद्गत्वादिस्फटिकप्रसादस्य गुरुतादिति। तं गुरुरागं न व्यभिचारात्। व्यभिचारमेव स्फोरयति। नहीति। न हि वत्सप्रसिद्धे वेले
प्रसिद्धरूपमध्यारोपयतीति नियमं तु रात्रावात्मन्यध्यारोपणदर्शनात्। गौरोऽहं कृष्णोऽहमिति देहधर्मस्याहंप्रत्ययविष
ये आत्मन्यहंप्रत्ययविषयस्य च देहे अयमहमस्मीति। देहस्य तद्धर्माणां गौरत्वादीनामहंप्रत्ययविषये तस्य च देहे
ध्यासो यथानुभूयते तथान्तःकरणस्य तद्धर्माणां च कर्तृत्वादीनां चिदात्मनि तस्य चैतन्यस्यान्तःकरणेऽध्यासः स्पष्ट
ति। किं हि प्रमाणोऽस्य संस्काराध्यासनिबन्धनं केवलव्यतिरेकाभावादित्यर्थः॥ दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमभिप्रेत्य
शंकते। दोष्य इति। आह प्रसिद्ध एव तत्र तावदहंप्रत्ययविषयतया देहश्चायमिति। आत्मनोऽहंप्रत्ययविषय
त्वेन देहस्य च तदहंकारास्पदत्वेन प्रसिद्धत्वेऽपि तन्निग्राह। तत्रैवमिति। तत्रैवं सति प्रसिद्धयोरेव देहात्मनोरितरेतरा
ध्यारोपणा स्थाणुपुरुषयोः शुक्तिरजतयोरिवेत्यर्थः। दृष्टान्ते प्रसिद्धस्यैव प्रसिद्धान्तरेऽध्यारोपणमिति सिद्धं स साचार्य
वचनं न तु विकल्पमदेयमापन्नमिति साहा। तत्रेति। तत्र कं विशेषणमाश्रित्य प्रसिद्धस्यैव तेनरेतरा

॥अनात्मनि ८३ — चद — १२ — १२ — नात्

(२४)

५ देहात्मनोरविविक्तत्वेनाप्रसिद्धिमेव प्रकटयति ॥ नहीति ॥ न ह्यहं देहोऽयमात्मेति विविक्ततया [blot] प्रत्यक्षाभ्यां देहात्मानौ यः कश्चिद् द्रक्ष्यति ॥ ५

ध्यारोपणेति नैव नियन्तुं शक्यमिति ॥ दार्ष्टान्तिके त्वहंप्रत्ययविषयत्वमतिरिक्तस्य चिदात्मनोऽप्रसिद्धत्वान्न तत्रान्तःकरणस्य तद्धर्म
स्य वा कर्तृत्वादेरध्यासः सिध्यतीति भावः ॥ दृष्टान्तवद्दार्ष्टान्तिकोपपत्तिं दर्शयितुमुपक्रमते ॥ शृण्विति ॥ शृणु ॥ दृष्टान्ते देहात्मनो
सर्वलोकप्रसिद्धो न तथा चिदात्माहंकाराविति विप्रोऽयमाश्रित्याहसत्यमिति ॥ सत्यं प्रसिद्धौ देहात्मनौ न तु स्थाणुपुरु
षौ विविक्तप्रत्ययविषयतया सर्वलोकप्रसिद्धौ ॥ विविक्तत्वेन देहात्मनोर्न [struck out] प्रसिद्धिः [struck out]
कथं प्रसिद्धिरभ्युपगम्यत इत्याशङ्क्याह कथमिति ॥ कथं ॥ तर्हि नित्यमेव निरन्तरा विविक्तप्रत्ययविषयतया प्रसिद्धौ देहा
त्मनोरविविक्तत्वेन प्रसिद्धिरित्यत्र वादिविप्रतिपत्तिं लिङ्गत्वेन दर्शयति ॥ अत एवेति ॥ अत एव हि मोमुह्यते लोक आत्मा
नात्मविषये एवमात्मा नैवमात्मा ॥ यद्यपि गौरोऽहमित्यारोपदार्थद्वयं प्रतिभाति तथापि भेदविशिष्टतया न भाति अ
न्यथा लोकायतिकानां विवादाभावप्रसङ्गात् अतो यथा तत्र देहात्मप्रसिद्ध्यहं कर्तरि गौरत्वाद्यध्यासस्तथा ममापि
चिदात्मन्यहंकारस्य तद्धर्माणां च कर्तृत्वादीनामध्यासो भविष्यतीति मन्वानः शङ्कते इत्याहेति ममेति ॥ इतीमपि दोषमा
श्रित्यावोचं नैव नियन्तुं शक्यमिति ॥ आत्मानात्मनोरितराध्यासे द्वयोरपि मिथ्यात्वप्रसक्तेः भ्रमस्य वास्तवोत्पत्तिरिति तांक
तेनान्वेति ॥ ननु यद्यत्राविद्याध्यारोपितं तत्तत्रासद्दृष्टं ॥ आरोपितस्याधिष्ठाने नास्ति सत्यत्वमित्येतद्दृष्टान्तेन स्पष्ट
यति ॥ यथेत्यादिना ॥ यथा रजतं शुक्तिकायां स्थाणौ पुरुषः रज्ज्वां सर्पः आकाशे तलमलिनमित्यादि तथा देहात्मनोर
पि नित्यमेव निरन्तरा [blot] विविक्तप्रत्ययत्वेनेतरेतराध्यारोपणात् नानात्वरूपयोर्नित्यमेव सत्त्वं स्यात् ॥ इतना यदाऽस्य

३१ धं१ यथा१

ध्याहारः । तस्मिन्नेवाध्यस्तानां दार्ष्टान्तिकरूपं प्रपंचयति ॥ शुक्तिकादिष्विति ॥ यथा शुक्तिकादिष्वविद्याध्यारोपितानां रजता
दीनां शुक्तिकादिषु नियतमेवासत्त्वं सत्त्वं तद्विपरीतानां च विपरीतेषु तद्देहात्मनोरविद्ययैवेतरेतराध्यारोपणाद
तास्यात् ॥ तत्रैवं सति देहात्मनोरसत्त्वं प्रसज्येत ॥ तद्विपरीतानां रजतादिव्यतिरिक्तानां शुक्तिकादीनां विपरीतेषु शु
क्तिकादिचिल्लक्षणेषु रजतादिषु नियमेनासत्त्वं सत्त्वमिति संबन्धः कर्तव्यश्चेदित्यध्याहारः । प्रसंगस्येष्टत्वान्न दु
ष्टत्वमिति ॥ न चानिष्टत्वेनात्राकृतप्रसंगात् । आत्मानात्मनोरितरेतराध्यारोपेऽन्यथा दृश्येतापद्यते तर्हि देहा
दावात्मारोपवैपरीत्येन देहादेरेवात्मन्यध्यारोपः स्यात् तथा च सात्मनोऽसत्त्वप्रसंगाभावादिसारांकाममनुपपद्यते ॥
अथेत्यादिना ॥ अथ तद्विपर्ययेणादेहात्मन्यविद्याध्यारोपितः देहस्यात्मन्यसत्त्वं प्रसज्येत । प्रसंगस्येष्टत्वोक्तेश्चात्मा
पाचित्वोपेनप्रसादित्वात् ॥ तच्चेति । तच्चानिष्टं प्रसक्ष्याहिचि रोधात् । इतरेतराध्यासस्य अन्यतराध्यासस्य चानु
पपन्नत्वमुपपादितमुपसंहरति । तस्मादिति । तस्माद्देहात्मनो नाविद्ययैवेतरेतरस्मिन्नध्यारोपितो । यद्यपि तदितरे
राध्यासो न घटते कथं तर्हि गोऽहमित्यादिप्रमाणाधिकरणमध्यात्मिति शंकते कथं तर्हीति । कथं तर्हि । मीमांसको ब्रूते ।
वंत्रोति । एवं सत्यभवन्निति संयुक्तौ ॥ किं च नान्तीतु पारिशेष्यादितरेतराध्यासं सिसाधयिषुराह परपक्षं प्रतिक्षिपति । नानि
त्यत्वेति । न अनित्यत्वपारार्थ्यप्रसंगात् । प्रसंगमेव प्रकटयति । संहतत्वादिति । संहतस्य सापारार्थ्यमनित्यत्वं च दृष्टं
भादियेद्वा । इतश्चात्मा देहादिसंयुक्तो न भवतीत्याह । किं चेति । किं चादेहादिनाचेतनस्यात्मनोऽन्यत्र सत्तार्हि संहतत्वादासनादि

शं १३

१३ आ

वदसंहतत्वदोषः स्यादिति संहतविलक्षणात्मसिद्धिरित्याह। यस्त्विति। यस्त्वपरैर्देहेन संहतः कल्पितः आत्मा स संहतत्वात्परा
र्थः। तेन संहतः परो नित्यसिद्धत्वात्। आत्मा चेदेवमसंहतोऽस्ति तर्हि तस्य देहादावधिष्ठानेन तन्मात्रत्वेनारोपितत्वे संह
ते सति असत्त्वादिदोषप्रसंगो यः शंक्यते स न भवति आत्मनस्संसृष्टत्वेनारोपेऽपि स्वरूपेणारोपाभावादिति आत्मनो सं
हतत्वे फलं कथयति। न स्यादिति। न स्यात् संहतस्य देहे देहमात्रतयाऽध्यारोपितत्वेनासत्त्वानित्यत्वादिदोषप्रसंगो न भवति।
आत्मा परमार्थतोऽसंहतश्चेत्तर्हि देहादेर्निरात्मकत्वमिति पक्षांतरप्रसक्तिरिति शंकते ननु चेति। ननु च निरात्मको देह इति
वैनाशिकपक्षप्राप्तिदोषः स्यात्। परमार्थतोऽसंहतस्यापि देहादेः संसर्गाध्यासाभ्युपगमाद्देहादेश्च सात्मकत्वं सिध्यतीति
परिहरति नेत्यादिना। न सत एवात्मनः आकाशस्येवासंहतत्वाभ्युपगमात्सर्वेण संहतः स्यादात्मेति। न निरात्मकं देहादि स्या
र्वै। स्यात्। तदेव प्रपंचयति। यथाकाशः सर्वेणेति। यथाकाशस्सर्वेण संहत इति। सर्वं न निराकाशं भवति एवं तस्मान्न वै
नाशिकपक्षप्राप्तिदोषः स्यात्। देहादेरात्मन्यध्यस्तत्वे न तस्याऽसत्त्वे प्रमाणविरोधः स्यादिति परोदीरितमनुभाष्य दूषयति। यस्तु
न इति। यस्तु न तत्कं देहस्यात्मन्यध्यस्तत्वेनासत्त्वे प्रत्यक्षादिविरोधः स्यादिति तन्न प्रत्यक्षादिभिरात्मनि देहस्य सत्त्वानुपलब्धेः।
अनुपलब्धिमेव साधयति। नहीति। न ह्यात्मनि कुंडे बदरं क्षीरे सर्पिः [illegible] तिले तैलं भित्तौ चित्रमिव च प्रत्यक्षादिभिर्देह उपलभ्यते। आत्म
नि देहादेरप्रमाणिकत्वे फलितमाह तस्मादिति। तस्मान्न प्रत्यक्षादिविरोधः। आत्मा प्रमितो वाऽप्रमितो वा प्रमितत्वेनाधिष्ठानत्वमारोपत्वं
वाऽप्रमितत्वे विरोधादप्रमितत्वेनाधिष्ठानत्वादि सिध्यति अप्रतिपन्नस्य न दृश्ययोगादिति शंकते कथमिति। कथं तर्हि प्रत्यक्षाद्यप्रमितआत्मनि

पि२

४ | चितिमतः अचितिमतो चितिमत्त्वादेव स्वार्थसंबंधानुपपत्तेः॥ अ॥ स्तु तर्हि द्वयोरेवार्थिनोश्चितिमत्त्वं न स्यात्॥ नाप ४

भिमाध्यं प्रकरद्यमिति। तं गुरुरिति। तं गुरुरुवाचापद्यं तर्हि स्वार्थत्वं चितिमत्तास्त्वपरेणाप्रयुज्यमानेन देवस्पष्टयति। न होति

न हि चितिमान्नपरतंत्रः परेण प्रयुज्यते। चितिमत्त्वेपि परेण प्रयुक्तत्वं किं न स्यादित्याशंक्याह किमुभयोश्चितिमत्त्वं किं वान्य

वि३ न रस्येति कथ्यायं दूषयति। चितिमत इति। चितिमतश्चितिमदर्थत्वानुपपत्तेः समत्वात्सकार्ययोरिवाद्वितीयं प्रसा

ह नापीति। नाप्यचितिमदर्थत्वं चितिमतो रिति। नाप्यचितिमतो रन्यो न्यार्थत्वं दृष्टं न हि काष्ठकुड्ये अन्यो न्यानर्थत्वं कुर्व

तों सम५ नैचितिमत्त्वान्नशेषशेषित्वमित्यत्र व्यभिचारं शंकते नन्विति। ननु चितिमत्त्वस्य समत्वेपि भृत्यस्वामिनोरन्योन्यार्थत्वं दृष्टं। भृ

त्वा ८ त्यस्वामिनोः स्वाहत्वेन चेतनयोर्भावादचेतनमेव दारादि तमन्यो न्यार्थमिष्टमात्मनि पुनरनेकत्वतादिवच्चितिमत्त्वस्यापि चिन्मा २५

त्रैर्नैया विवक्षितत्वान्नशेषशेषित्वोपपत्तिरित्युत्तरमाह। नैवमिति। नैवं अनेकत्वप्रकारावच्चितिमत्त्वं विवक्षितत्वात्तस्य

२५ तू ८ आत्मनश्चि[illegible]रूपस्यापि चिद्दत्तत्वशेषित्वं स्यादित्याशंक्याह दर्शितश्चेति। दर्शितश्च दृष्टांतः प्रकारयोरिवेति। अद्विती

यचैतन्ये अन्यशेषत्वरहिते सिद्धे सति सिद्धमस्य परमात्मत्वमिति फलितमाह। तत्रेति। तत्रैवं सति स्वबुध्यातदेव

घ५ सर्वमुपलभसे अयमु[illegible]प्रकारान्तरेणकूटस्थनित्यचैतन्यस्वरूपेणाभवतात्मनः सर्वदा निर्विशेषचिन्मात्रत्वेनप

रमात्मत्वं तथापि किं निरासत्वं स्यादित्याशंक्याह भयस्थात्रयसंबंधद्वारेण तस्मिन्दुःखानुभवाशंकापराहतनाभवतीत्याह

यदि चैवमात्मनः सर्वदा निर्विशेषत्वमभ्युपगच्छसि किमिति चिवान्नसुषुप्तविश्रम्य विश्रम्य जाग्रत्स्वप्नयोर्दुःखमनुभ

वामीति किमयमेवमम स्वभावः किंवा नैमित्तिक इति चाक्षोहमाहमात्मनो स्वानुकाश्यंका सावकाशोति चेत्तत्राह। किं नेसाविति।

किंते सोव्यामोहोऽपगतः किं वा न आत्मनः चिद्रूपस्य निर्विशेषस्य परमात्मत्वे नाज्ञानतत्कार्यसंबंधाभावस्याचार्यवचन

चैतन्यात्मत्वात्स्वार्थोऽहंप्रत्ययानां नीलपीताद्याकाराणामुपलब्धेति विक्रियायामनेव कूटस्थ इति संशयकारणं
विरुद्धत्वेन निश्चायकत्वेनेति तं गुरुरुवाच। नन्वुक्तं त्वया संशयः को हि परिणामिचित्तानादिः तस्य क्रमेण स्व
विषयग्राहकत्वेऽकृतिपयग्राहकत्वं च दृष्टं न[illegible]पकमात्मनो व्यावर्त्तमानं परिणामित्वमपि तस्य व्यावर्त्तयतीति परो
दीरितस्य संशयहेतोर्विरुद्धत्वं साधयतीति मन इति। यत्तु तेषां प्रत्ययानां नियमेनात्मोपलब्धत्वादेव परिणामित्वात्
कू[illegible]टस्थत्वसिद्धौ निश्चयहेतुमेवाशेषचित्तप्रचारोपलब्धत्वं संशयहेतुमाशंक्य कूटस्थत्वनिश्चयहेतुमेवात्मनो निः
शेषचित्तप्रचारोपलब्धत्वमोहात्त्वं संशयकारणं कथयसि॥ तथा च सति संशयो मुक्तो नेत्यलमेव व्यतिरेकद्वारा स्फो
रयतीति यदीहितं। यदि हि न परिणामित्वं स्या[illegible]दशेषस्वविषयचित्तप्रचारोपलब्धत्वं न स्याच्चित्तस्येव स्वविष
ये यथा चेन्द्रियाणां स्वविषयेषु न च तथात्मनः स्वविषयैकदेशोपलब्धिः। अपर्यायेणानिःशेषचित्तप्रचारोपलब्ध
त्वादात्मनोऽपरिणामित्वेन न च कूटस्थत्वमेवेति स्थितमिति निगमयति। गत इति। अतः कूटस्थ एवेति। ननु रागादीनां बाधा[illegible]
योश्चित्तादुपलब्धेः स्वत्र क्रिया प्रकाशस्वार्थो भाति प्रत्ययार्थस्य कर्त्तावभासते न तथा चोपलब्धौ कूटस्थश्चेति नि[illegible]
[illegible]तीति प्रत्ययार्थपर्यालोचनायां विरोधः स्यादिति शंकते। तत्राहेति। न त्वाह उपलब्धिर्नाम धात्वर्थो विक्रियैवोपलब्धुः कूट
स्थता चेति विरुद्धं। किमेतौ प्रकृतिप्रत्ययार्थौ मुख्यावेवाभीष्टौ किं वा गौणौ। अपि भवतु नाधः सविनाशकोऽशतः स्यादि
प्रयोगदर्शनादिति मत्वा द्वितीयं प्रत्याह। नेत्यादिना। न धात्वर्थो विक्रियायामुपलब्धेरुपचारात् यथा चेदृशो

ध्या॰३ १६ ना॰४ अ १६ ह्र४ ध्यु

सोपः पिंडोद्दहनी स्फपचारेणोच्यते तथा प्रज्ञानं ब्रह्म कूटस्थमचलं ध्रुवमित्यादिश्रुतिसिद्धेन नित्योपा[illegible]लब्धिस्वभावेनात्म
नाप्यात्मोहंकारादिरूपेणेदंहमित्युपचर्यते तेनाप्यविषयेणेनं प्रकृतिप्रत्ययव्यपदेशेन प्रकृतिप्रत्ययसाक्षिणो न विरुध्यते कूटस्थ
त्वमित्यर्थः ॥ महदादिद्रव्यस्य परिणामोपपत्तिः द्रव्यात्मको यथा दृष्टः तथाहंकारद्रव्यस्याविषयपर्यन्तं संचारि परिणामोऽप्य
पप्रभास्त्रानीयो द्रव्यं स्यात् तथा च कथं तस्य क्रियात्वमुपचरितुं त्वाक्यमित्याशंक्याह यो हीति। यो हि बोद्धृप्रत्ययः
स धात्वर्थो विक्रियात्मकः आत्मन उपलब्ध्याभासफलावसान इति उपलब्धिशब्देनोपचर्यते यथा जले प्रतिबिंबि
तः सविता तत्र प्रकाशाभासो हृद्यहेतुस्तथैवात्मा बु[illegible]द्धिप्रतिबिंबि[illegible]तो नित्योपलब्धिस्वभावः तत्र प्रकाशाभा
सो हृद्यहेतुर्भवति न तत्रोपलब्ध्याभासफलावसानत्वा बुद्धिपरिणामस्य क्रियात्वेनोपचारः संभवतीत्यर्थः। उक्त
मेवार्थं दृष्टांतेन स्पष्टयति यथेति। यथा छिदिरिक्रियाद्वैधीभावफलावसानेति धात्वर्थेनोपचर्यते तद्वत् दृष्टा
न्ते वैषम्यं शंकते इत्युक्तरूपमिति। इत्युक्तं श्रीभाष्ये हि। ननु भगवन्नमकूटस्थनित्यत्वप्रतिपादनं प्रसत्तमर्थे दृष्टांतः
दृष्टांतस्य दार्ष्टांतिकानुगुणत्वाद्धि समेवम्प्रकटयति। कथमित्यादिना। कथं छिदिः छिदाक्रियावसानाउपच
र्यते यथा धात्वर्थेनानुतथा उपलब्धिशब्दोपचरितोपि धात्वर्थो बोद्धृप्रत्ययश्चात्मोपलब्धिविक्रियावसानश्चे
त्यात्मनः कूटस्थतां प्रतिपादयितुं न समर्थः दृष्टांते छेद्ये विक्रियादर्शनाद्दार्ष्टांतिके विक्रियाप्र
संगान्न कूटस्थत्वसिद्धिरित्यर्थः। दृष्टांते छिदिरिछेद्ययोरिव दार्ष्टांतिके प्रसंगात् उपलब्धे रूपलब्धुश्च भेदाभा
वा[illegible]त्वाकूटस्थतेत्याह सत्यमित्यादिना। सत्यमेवं स्याद्युपलब्धेर्भिन्न[illegible]त्वेष्वेति। नित्योपलब्धिमात्र एव

ब्ध्युप

38

पुनश्शंकते। यदीति। यदि भगवन् सुषुप्तावेव विक्रियामन्मानोऽस्ति कथं स्वप्नजागरिते। आत्मनि परमार्थतः स्वप्नजागरिते प्रत्यक्षे
रसिद्धावपि भ्रांत्यनुरोधात्तस्मावेष्ट्यस्याचार्यस्समाचष्टे तं गुरुरिति। तं गुरुराह किं चानुभूयते त्वया संततं संततमिति वि
त्रोषण मम दृष्ट्यमाणात्स आह बाढमिति॥ बाढमनुभवामि किंतु विच्छिद्य विच्छिद्य न तु संततं यदि स्वप्नजागरितयोरागंतुकत्व
मभ्युपैषि तर्हि तयोस्तथात्वे सिद्धे न तेन वा लक्ष्यते भवितुमुत्सहते आगंतुकत्वादनुभूयमानत्वाच्च घटादिवन्नचानयोरात्मसंबं
धत्वं संबंधस्य दुर्वचनत्वादित्याह तं गुरुरिति॥ तं गुरुराह तर्हि आगंतुकत्वेनुतेन न तवात्मन्यते। विपक्षे तयोरागंतुकत्वमनुभू
यमानत्वं च न स्यादित्यप्रयोजकत्वं परिहरतीत्यहीति। यदि न वा लक्ष्यते चैतन्यवत्स्वरूपत्वेन स्यात तर्हि विच्छेदः स न न एव स्यातां।
किंच स्वप्नजागरिते न तवात्मनस्ते व्यभिचारित्वाद्वस्त्रादिवदित्याह। नहीति। नहि यस्य यत्स्वरूपं तत्तस्य व्यभिचारि दृष्टं। स्व
प्नजागरिते तु चैतन्यमात्रं त्वां व्यभिचरतः। आत्मस्वरूपं चैतन्यस्य सुषुप्ते व्यभिचारदर्शनाद्व्यभिचारित्वहेतो व्यभिचारित्वा
न्नसाधकत्वमित्याशंक्याह। सुषुप्ते चेति। सुषुप्ते चेत्स्वरूपं व्यभिचरेत् नष्टं नास्तीति वा बोध्यमेव स्यात् आगंतुकानामतद्धर्माणा
मुभयात्मकत्वदर्शनात्॥ आत्मनि स्वाभाविकस्याभावे नागंतुकत्वमाविष्कर्तुमतद्धर्माणामित्युक्तमुभयात्मकत्वदर्शनमुदाह
रणाभ्यां दर्शयति। यथेति। यथा धनवस्त्रादीनां नाशो दृष्टः स्वप्नभ्रांतिरूपत्वव्यानां च बोधो दृष्टः॥ अतिप्रसंगमाशंक्य तेनन्वेवमिति।
नन्वेवं भगवन् चैतन्यस्वरूपमप्यागंतुकं प्राप्तं तस्यागंतुकप्राप्तौ हेतुमाह। स्वप्नेति। स्वप्नजागरितयोरिव सुषुप्ते नानुपलभ्या
न्मनुपलब्धेः दृष्टिश्चेतिरित्यादिरूपं हि चैतन्यं स्वप्नजागरितयोर्बाह्याभ्यां मुच्यते तथा च तच्चैतन्यं सुषुप्ते दृश्यते चैतन्यं नास्ति [illegible] सा

त३

गंतुकत्वं दुःपरिहारमित्यर्थः। किंच स्वप्नजागरितेचेदात्मनः स्वरूपप्रच्युते न भवतः तदा चैतन्यमेवस्वरूपं न भवती स्फटिकस्यानन
न्यासनो जडत्वमनुभूतं भवेदित्याह। अचैतन्येति। अचैतन्यस्य स्वरूपो वा स्यामहं। द्रष्टुरादौ रोपाधिकरूपस्यागंतुकत्वेपि स्वरूप
चैतन्यमात्रमागंतुकमिति विचार्यतं हं न विजानीहीति सिद्धांतिब्रूते नपद्यतेति। नपद्यते। चैतन्यमात्रस्यैनोपाधिकस्यागंतुक
त्वानुपपत्तिरित्युक्तेर्थे हेतुमाह तदनुपपन्नेरिति। तदनुपपत्तेः। अनुपपत्तिमेव साधयति चैतन्येत्यादिना। चैतन्यस्वरूपं चेदागंतुकं
पत्रपत्स्विपत्रमनंतद्दर्षचातेनाप्युपसा कल्पयितुं शक्नुमो वयं। एवं चेसत्रयस्तितर्हि पत्रमपर्यालोचयव्यर्थंतु नद्दर्षरातेनापिपु
न्याघटयितुं शक्नुमः॥ तत्राहक प्रमाणाभावादित्यर्थः॥ तर्हि सद्धातिरिक्तः कश्चिच्चैतन्यस्यान्येभावं निश्चिनोती सा त्वंकस्त्वं किमचे
तनश्चेतनो वेति विकल्प्याद्यं प्रत्याह। अन्योवेति। अन्यो जाचेतनो पि तस्यसंहतत्वात्परार्थमनेकत्वं नाशित्वंचतनकेनचिदुपप
त्त्यावारयितुं शक्यं। अस्वार्थस्य स्वतः सिद्ध्यभावादित्यवोचाम। यश्चेतन्यस्य [illegible] मावमाकलयेत्तचेच्चैतन्यादन्योप्य
चैतनो मन्दो भ्युपगम्यते सोपि तर्हि संहतत्वादि दोषभाङ्गाच्चैतन्यगोचरत्वान्न तस्याभावमुद्भासयेत् नहि चैतन्यादन्यो [illegible] चेतन
त्वयमपि स्वेहमत्र शक्नुवन्ननाभावं चैतन्यस्य साधयितुं शक्नोतीत्यर्थः॥ यदि चैतन्येनैव चैतन्यस्यागंतुकत्वं घटस्येनेतन्यास्व
स्कंधारोहकल्पनायास्स्वप्नष्टत्ते र्संभवात्ननेदकाकारमंतेण भेदायोगादित्यभिप्रेत्याह। चैतन्यमिति॥ चैतन्यस्वरूपस्या
त्मनस्स्वतस्सिद्धत्वेनान्यानपेक्षत्वं केनचिद्वारयितुं शक्यं। किंच आत्मनः स्वसत्तायां चैतन्याव्यभिचारादनागंतुकं चैतन्यमेति तथ्यं
ग्रतश्चैतन्यमनागंतुकं अभावश्चन्यत्वात्तन्नष्टं गच्छादित्याह। अव्यभिचारादिति। अव्यभिचारात्। पत्रपत्स्तदनुपपन्नेरित्या

म२ प५ न६ १८ ग१ १८

दिपाठोपि यथोक्तरीत्यानेतव्यः। आत्मव्यभिचारासिद्धिं शंकते नन्विति। ननु व्यभिचारो दर्शितो मया सुषुप्ते न पश्यामीति। अयमह
मस्मीत्यात्मानमिमानि भूतानीत्यनात्मानं च सुषुप्ते न पश्यामि तेन तत्र चैतन्याभावाद् व्यभिचारादि निहेतो रसिद्धिरित्यर्थः
सुषुप्ते न पश्यामीति वचनस्य विरुद्धत्वान्नैवं वक्तव्यमित्युत्तरमाह नव्याहतत्वादिति॥ नव्याहतत्वात्॥ व्याहतिमेव प्रश्नद्वारा
प्रकटयति। कथमित्यादिना। कथं व्याघातः पश्यन्न त्वं न पश्यामीति वचनं व्याहतं॥ पश्यन्न त्वं वेत्सेतदभ्युपाह ननु कदाचि
दिति॥ ननु कदाचिद्भगवन् सुषुप्ते मया चैतन्यमन्यद्वा किंचिद्दृष्टं॥ यदि सुषुप्ते न किंचिदन्यस्य त्वया स्वितर्हि न किंचिदेतावंतं
कालं मया दृष्टमित्यस्य तस्य परामर्शोन्यथानुपपत्त्या त्वया पश्यतापि दृष्टेर्व्यभिचारः कल्पितस्तत्राह पश्यकस्तर्हि
सुषुप्ते त्वं द्रष्टेति यावत् पश्यन्निति पाठे अयमेवार्थः। आत्मनः सुषुप्ते दृष्टिरस्तीत्यत्र हेतुमाह। यस्मादिति। यस्माद्दृष्टमेव प्रतिषे
धसि न दृष्टं सुषुप्ते दृष्टिरि[illegible] तथापि चैतन्यं कथं सिद्धं तत्राह॥ यातवेति। या तव दृष्टिः तच्चैतन्यमिति मयोक्तं। न देवस्फु
ष्टयति यत्पेति। यया त्वं विद्यमानया किंचिद्दृष्टमिति प्रतिषेधसि सा दृष्टिस्तच्चैतन्यं चैतन्यस्याव्यभिचारे दर्शिते नित्यासिद्धि
नस्य कूटस्थस्य प्रकाशत्वं च सिद्धमित्याह नहीति॥ नहि चैतन्यस्य सर्वत्राव्यभिचारात् कूटस्थनित्यत्वं सिद्धं स्वत एव प्रमाणा
पेक्षं। स्वप्रकाशत्वे हेतुं तरमाह। स्वतः सिद्धस्येति। स्वतः सिद्धस्य हि प्रमातुरन्यस्य प्रमेयस्य परिच्छित्तिं प्रति प्रमाणापेक्षायामन्या
त्मनिष्ठा परिच्छित्तिरपेक्ष्यते। नान्यस्य परिच्छित्तिरूपस्य परिच्छेद्याय। प्रमाता। चिद्रूपत्वादन्यापेक्षणमनवस्थापत्तेरतिप्रसंगाद्ध
स्वभावश्चानित्यश्च न तस्य व्यतिरिक्तं यत्प्रमेयं घटादि स जडस्याचिद्रूपस्य परिच्छित्तिर्निश्चितिस्तामुद्दिश्य प्रमाणापेक्षायां

शि
नप
लं४

न

ससांघटादैरन्या प्रमाणजन्या परिच्छित्तिरनिसापेक्षते प्रमातुरनिरीक्तस्य प्रमेयस्या संविद्रूपस्य निश्चयाय प्रमाण
द्धारा परिच्छित्ति सापेक्षासा मुक्तत्वात्प्रमातानु संविद्रूपत्वाद्दसंदिग्धस्वभावत्वाच्च निरपेक्षाः स्फुरंतीत्यर्थः॥ संवित्स्वभा
भावत्वं स्फोरयति साहीति॥ साहि निरस्यैव कूटस्था स्वयंज्योतिस्स्वभावात्मनि प्रमाणत्वे प्रमातृत्वे च नतो प्रतिप्रमाणापेक्षा॥
आत्मनि बुद्धिवृत्तिप्रतिबिंबिते प्रमाणत्वं वृत्तिमदंतःकरणप्रतिबिंबिते च प्रमातृत्वं कल्प्यते तत्रोभयत्रास्त स्फूर्तिन प्र
प्रमाणापेक्षा मुच्यते स्वयं संवित्स्वभावत्वादित्यर्थः॥ असंवित्स्वभावस्यैव प्रमेयस्य प्रमाणापेक्षा नात्मन स्वसंवित्स्वभावस्येत्यत्र
दृष्टांतमाह॥ यथेति॥ यथा प्रकाशानमुष्णत्वं लोहोदकादिषु परोपेक्ष्यते अग्न्यादिसाहित्यात् न तत्स्वभावत्वान्नाग्न्यादिस्यादीकांत
दृपेक्षा सर्वदा तत्स्वभावत्वात्॥ निरस्यैव संविदि स्फक्तमाक्षिपति अनिसत्वमिति॥ अनिसत्वेऽपि प्रमात्यान्निसत्व इति चेत्॥
चक्षुरादिप्रमाणसामग्रीप्रसक्ता प्रमेयावगादिस्फच्यते॥ तथाच प्रमातृत्वप्रसिद्ध्यनुपपत्त्यैव स्वसंवित्तेरनिसत्वं च कल्प्यमि
त्यर्थः॥ प्रमाणाभासानामज्ञानपरिणामत्वाश्रयणात्संविदितः प्रमेयेनावलेपत इयावतीति सिद्धेर्जन्यत्वविरोधं यथार्थानिस्क
नरमाह॥ नावगतेरिति॥ नावगतेर्निसानिसत्वयोर्विरोधानुपपत्तेः॥ विरोधानुपपत्तिमेव विशदयति॥ नहीति॥ नत्ववग
तेः प्रमात्वे निसावगतिः प्रमानानिसेति तु विरोधोवगम्यते॥ चक्षुरादिजनितबुद्धिवृत्त्यभिव्यक्तावगतेः प्रमात्वे स
ति निसावगतिः प्रमाणं न भवति अनिसा प्रमेति विरोधो न प्रतिभातीत्यर्थः॥ तत्र पूर्ववादिविरोधं दर्शयति॥ निसायामिति॥
निसायां प्रमातुः प्रमाणापेक्षाभावः अनिसायां तु यत्नोत्तरितत्वाद्द्वगतिरपेक्ष्यत इति विरोधः स्यादिति चेत्॥ निसावगोति

निं ३ तो १८

१९ २६

यां १

पक्षे प्रमातुः स्वावगतये प्रमाणापेक्षा न भवति। अनित्यसंविदवगतौ प्रयत्नव्यवधानादवगतिसाधनमपेक्षते प्रमाते
ति विरोधोऽस्तीत्यर्थः॥ नित्यावगतिपक्षे प्रमाणानैरपेक्ष्यं स्वयोच्यते चेत्तर्हि सिद्धमस्मदिष्टमिति सिद्धान्त्याह
सिद्धेति। सिद्धान्ते आत्मनः प्रमातुः स्वतः सिद्धिः प्रमाणनिरपेक्षैव। प्रमाणनिरपेक्षत्वेन स्वतः सिद्धिमभ्यु
पगतानां प्रमाणाभावापेक्षाभ्युपगताऽभवति सापि प्रमाणाभावविषयापेक्षा न वाच्या नित्यत्वादवगतेरिति [illegible] पूर्ववादी आह
[illegible] अभावेपीति। अभावेप्यपेक्षाभावः नित्यत्वादिति चेत्। स्वभावत एव अवगतेः स्वाज्ञा वा प्रमाणाभावेपि नापेक्षा तत्स्फुरण
[illegible]रमाह। नावगतेरिति। नावगतेरात्मनि सद्भावादिति परिहृतमेव। आत्मनः स्वतः सिद्धौ हेत्वंतरमाह प्रमातुश्चेदिति। प्रमातु
श्चेत्प्रमाणापेक्षया सिद्धिः कस्य प्रमित्सा स्यात्॥ ततो व्यतिरिक्तस्यैव तद्विषया प्रमित्सा ते स्यादित्याशंक्याह यस्येति। यस्य
प्रमित्सा स एव प्रमाताऽभ्युपगम्यते। किंचिदप्युत्कर्षादिकमिष्टं वस्तु लोके प्रमातुरिष्यते न तु प्रमातृविषया काचिदिच्छा तस्यैव संग
च्छेत्॥ स्वकर्तृकेच्छाकर्मत्वायोगादित्याह। तदीयाचेति। तदीया प्रमित्सा प्रमेयविषयैव न प्रमातृविषया। प्रमात्रन्तरकर्तृ
केच्छाकर्मत्वं प्रमातुरिष्टमित्याशंक्यानवस्थाप्रसंगान्नेत्याह। प्रमात्रेति। प्रमातृविषयत्वे अनवस्था प्रसज्ये
त प्रमातुस्तदिच्छायाश्च। तत्र प्रमात्रनवस्थां प्रकटयति तस्यापीति। तस्याप्यन्यः प्रमाता तस्याप्यन्य इति। तदीयानवस्था
कथमिति एवमेवेति। एवमेवेच्छायाः प्रमातृविषयत्वे। यदि प्रमातुरिच्छा प्रमात्रन्तरविषया तर्हि इच्छापि प्रमात्रन्तरविषयत्वे
ति प्रमात्रनवस्थापत्तिवत्तदीयेच्छायाः अप्यनवस्था दुर्वारेत्यर्थः॥ इतश्चात्मनः स्वतः सिद्धिर्वक्तव्येत्याह प्रमातुरिति। प्रमातु[illegible]लतो

प ६
व ५
छा ३

हि४

व्यवहितत्वाच्च प्रमेयत्वानुपपत्तिः। आत्मनः स्वकार्यात्प्रमातुरव्यवहितत्वादेव प्रमेयत्वानुपपत्तेः। स्वगतसिद्धि
तिएतद्विप्रपंचयति लोके हीति। लोके हि प्रमेयं नाम प्रमातुरिच्छास्मृतिप्रयत्नप्रमाणजन्मव्यवहितं तस्माद्व्यतिरिक्तं नान्यथावग
तिः प्रमेयविषयाद्दृष्टान्तश्च प्रमाता स्वयमेव स्वस्य स्वकेन चिद्व्यवहितः। नाप्यकल्प्यपि तु प्रमाणादीनां प्रमात्मनेनापि व्यवहार
भूमौ घटादिकं वस्तु प्रमेयत्वेन प्रसिद्धं प्रमाता प्रथमं जिज्ञासते तस्य चेष्यमाणत्वात् तस्मिन्विषये समीहितलाभनत्स्मर
तितत्पावर्तते ततो यथार्थज्ञानेन प्रयत्नं प्रयत्नांतरं तत्र चक्षुरादिव्यापारात्प्रमाणमुत्पद्यते एवं प्रमातुरेतैर्व्यवहितं प्र
मेयं प्रसिद्धं प्रजनितयथोक्तेच्छादिव्यवधानव्यतिरेकेणावगतिर्न प्रमेयविषयं लोके क्वापि दृष्टा प्रमातुश्चात्मन एव स्वेच्छादी
नामन्यतमेन केनचिद्व्यवहितत्वे नैवकस्यचित्तु शक्यते तस्मात्प्रमेयत्वायोगात्प्रमातुः स्वतः सिद्धिरास्थेयेत्यर्थः। किं च स्मृ
तिरिच्छायाश्च न प्रमातृविषया भवितुमर्हतीत्याह। स्मृतिश्चेति। स्मृतिश्च स्मर्तव्यविषया न स्मर्तृविषया। तथेच्छापीष्टविष
यैवनेच्छावद्विषयत्वं। विपक्षे दोषमाह। स्मर्तेति। स्मर्तुरिच्छावद्विषयत्वे पुनर्योरनवस्था हि सर्वेव दर्पदिहार्या स्यात्। यदि स्मृ
ते स्मर्तृविषयत्वमिच्छायाश्चेच्छावद्विषयत्वं तथा स्मृतितद्वतोरिच्छातद्वतोश्च प्रमाग्राहकानवस्थादिवदनवस्था दुर्वारा
प्रसज्येत स्मृतेः स्मर्तृविषयत्वेऽपि स्मर्तुरन्तरविषयत्वाद् इच्छायाश्चेच्छावद्विषयत्वे च तद्विषयेच्छान्तरस्याप्यपेक्षा
त्वस्य तु स्वदिहारस्यादित्यर्थः। यदि विषयावगतिं रसिद्धति सावगतो व्यवहीयते प्रमातरि पुनर्न स्यात्। अनुसन्तो सतसुकु
ति। समस्तादिनिश्चयात्... तेव्याप्यकं रांकते। प्रमातृविषयेति। प्रमातृविषयावगतिस्तु सततोऽनवगत एव प्रमातरि हीनेत्व॥

२० २०

स्स्मर्तृविषयत्वे ३ द्व २ श्व२ स२ स्या२

प१

क्रिमनयाप्रक्रियास्तुश्रुतिसाम्यं परिहर्तुमवगतिविषयत्वमात्मनो विवक्ष्यते किं वा स्तुश्रुतिसाम्यपरिहारोऽस्य न घटते तत्राद्यं
दूषयति। नावगंतुरिति॥ नावगंतुरवगतेरवगंतव्यविषयत्वात्। यदि पुनरवगतेरवगंतृविषयत्वमिष्यते तत्र को दोष इति। त
त्राह। अवगंतृ इति। अवगंतृविषयत्वे चानवस्था पूर्ववदपरिहार्या स्यात्। यथा पूर्वं प्रमात्राद्यनवस्थोक्ता तथा अवगते
रवगंतृविषयत्वे तद्द्वितीयेणावगतेरपि तथाविधावगंत्रंतरविषयत्वादवगतेरवगंतुश्चानवस्था दुर्वारा स्यादित्यर्थः॥ द्वि
तीयं प्रत्याह अवगतिश्चेति॥ अवगतिश्चात्मनिष्कृष्टस्वनित्यात्मज्योतिरन्यतो न पेक्षते स्वसिद्ध्यै प्रागादित्या पुरुषप्रकाशावदिति
पूर्वमेव प्रसाधितं॥ अवगतेर्नित्यत्वमुक्तं तदनित्यत्वे दोषमाह अवगतेश्चेति। अवगतेश्चैतन्यात्मज्योतिषस्त्वात्मनित्यत्वे
चात्मनस्स्वार्थत्वानुपपत्तेः। न केवलं [illegible] स्वार्थत्वासिद्धिः परार्थत्वं स्यादित्याह। कार्येति। कार्यकारणसंघातवत्संह
तत्वात्पारार्थ्यं दोषं च वोचाम। उक्तमेवार्थं प्रश्नपूर्वकं समर्थयते कुत इत्यादिना। कथं चैतन्यज्योतिषः स्वात्मन्यनित्यत्वे
स्य सादित्यव्यवधानात्संहतत्वं नतत्वं तस्य चैतन्यज्योतिषः प्रागुक्तेत्यत्र साक्षोर्ध्वमात्मन्यभावाद्यनुशादिनाभिते
संहतत्वात्पारार्थ्यं स्यात्॥ प्रागुक्तं मित्सत्वाधिकरणप्रयुक्तं फलं कथयति॥ यदा चेति। यदा च तदनुसन्धानात्मनि विधीयते
तदात्मनः स्वार्थत्वं। चैतन्यभावापेक्षमात्मनः स्वार्थत्वं अर्थात्मनस्तु परार्थत्वं चैतन्याभावापेक्षमित्युक्तमेवं यन्न किं।
तद्भावेति। तद्भावाभावापेक्षयात्मानात्मनोः स्वार्थत्वपरार्थत्वसिद्धिः। आत्मनः स्वार्थत्वे सिद्धे फलितमाह। तस्मादिति॥
तस्मादात्मनोऽन्यनिरपेक्षमेव नित्यचैतन्यज्योतिष्ट्वं सिद्धं। आत्मनो नित्यचैतन्यज्योतिष्ट्वे प्रमातृत्वाभावात्प्रमातृत्व

न्या६

स५

ना३

प्रे

२१

पदेशोपपत्तिरिति निरांकर्तेनान्यथेति। नन्वेवंसति असति प्रमातृत्वे कथमात्मनोः प्रमातृः प्रमातृत्वमिति। चेतनस्य कूटस्थस्य
नित्यज्ञानस्यापि संभवत्योपचारिकं प्रमातृत्वमिति स्फुटतरमाह। अत्रोच्यते इति। अत्रोच्यते प्रमाश्रयानित्यत्वेऽनित्ये च स्वरूप
विशेषाभावात् तद्व्यपदिश्यते इति। अवगतिरिति। अवगतिर्हि प्रमा स्यात्तत्स्वतीवादि वृत्तिविकाराः अनित्याः कूटस्थनित्या
यास्त्वरूपविशेषेण न विद्यते। अवगतेर्नित्यत्वेऽनित्यत्वे च स्वरूपविशेषाभावात् प्रमातरि व्यपदेशस्य तु व्यवस्थोपपत्तिरिति
दृष्टांतेन स्पष्टयति। यथेति। यथा भावार्थस्य तिष्ठत्यादेर्फलस्य गत्यादि मूर्जकस्य नित्यस्याभावानित्यस्य धात्वस्वरूपविशेषो ना
स्तीति तु व्यपदेशो दृष्टः तिष्ठंति मनुष्याः तिष्ठंति पर्वताः इत्यादिस्तथा नित्यावगतिस्वरूपेपि प्रमातरि प्रमातृत्वव्य
पदेशो न विरुध्यते। भावार्थस्य तिष्ठत्यादेरिति समानाधिकरण्यं आदिशब्देन भवत्यादि गृह्यते तदीयं फलं गतिनिवृत्तिः
सत्संगत्यादि शब्देन भवनादि ग्रहणमित्यादिः इत्यादिपदं प्रपंचयति आस्ते भवतीत्यादि सर्वसंग्रहार्थं प्रमातुरवगते
स्वरूपत्वेन नित्यत्वेपि प्रमातृत्वव्यपदेशोपपत्तिरित्यत्र हेतुमाह फलेति। फलसामान्यादिति। नित्यत्वेऽनित्यत्वेपि फलसा
वगतेस्समानत्वात् प्रमातृत्वव्यपदेशस्यात्यन्तविरुद्धत्वेन समर्थः। कूटस्थस्योनित्यस्वभावत्वेपि प्रमातृत्वव्यपदेशमात्मनो
परिकल्पयितुमभ्युपगच्छन्त्या कर्तृत्वासंभवं वक्तुं चोपपन्नमुपपत्ति॥ अत्राहेति। अत्राह शिष्यः नित्यावगतिस्वरूपस्यात्मनोऽ
विक्रियत्वात् कार्यकरणैरसंहतत्वाद्देहादीनामिव यागादिभिः कर्तृत्वं नोपपद्यते॥ कार्यकरणैः संहतिं न प्राप्य कर्तृत्वं न
रे चेत्तर्हि कार्यकारणोपादानपूर्वं कर्तृत्वं भविष्यतीत्याशंक्याह॥ असंहतेनेति। असंहतस्वभावस्य कार्यकरणोपादाने

२१

45

५६

सत्तीष

न

अनवस्थाप्रसङ्गेन। कार्यकारणोपादानमपि क्रियासाध्यं तदुपादानान्तरमपेक्षं न दृपितथेत्यनवस्थाप्रसक्तिरित्यर्थः। यथा
तक्षादीनां वास्यादिकरसंहतानां वास्याद्युपादानेपि नानवस्थानभ्यागताविस्यादिसारं कार्यकतक्षादीनामिति। तक्षादीनां तु
कार्यकरणैर्नित्यमेव संहतत्वमिति वास्याद्युपादाने नानवस्था स्यात्॥ दार्ष्टान्तिके दृष्टान्ताद्विशेषं दर्शयन्ननवस्था
मुपपादयति॥ इहत्विति। इह तु संहननस्वभावस्य करणानुपादाने कर्तृत्वं नोपपद्यत इति। करणमुपादानं त
दुपादानमपि विक्रियैवेति तत्कर्तृत्वे करणान्तरमुपादेयं तदुपादानेप्यन्यादेति प्रमाणस्यानन्त्येऽनवस्थाप्र
पादितैवेर्थः॥ स्यात्तर्हि कर्तृत्वेऽसंभवोऽर्थः॥ एवमात्मनि द्वित्वेऽपि कर्तृत्वासंभवे वैभवं पेशाक्रियैव भावस्य यौ निस्सोगावा
कार्यत्वेनावगतत्वस्यासिद्धमर्थं पुरुषं प्रेरयतीति। मतान्तरमाशङ्क्य निराकरोति न चेति। न च क्रियैवात्मानं कारयति क्रियानिवार्तायास्स्व
रूपाभावात्। पूर्वादृष्टमेवात्मानं प्राप्य कर्तृत्वं संपादयतीति मतान्तरमाह अथेति॥ अथादृष्टमात्मानमभ्युपेत्य क्रियां कारयतीति चेत्। ता
अदृष्टस्यात्मव्यतिरिक्तत्वेनासत्त्वात् सिद्धत्वं घटादिवत्। न चानात्मत्वात् दृश्यत्वादात्मविषयत्वं न च ताभ्यामेव हेतुदृष्टान्ताभ्यामना
त्मन स्तस्यात्मप्रेरकत्वं॥ अतो न पूर्वादृष्टावष्टम्भादात्मनि कर्तृत्वसिद्धिरिति। दूषयति नान्यस्येति॥ नान्यस्य स्वतन्त्रस्य सिद्धत्वात्मविष
यत्वाद्यनुपपत्तेः। अदृष्टस्यानात्मनस्स्वतन्त्रसिद्धत्वाभावं स्पष्टयति॥ न हीति॥ नेत्यात्मनोऽन्यदचेतनं वस्तु स्वप्रमाणकं दृष्टं॥ कथं
तर्हि शब्दादेस्सिद्धिरित्यत्राह शब्दादीति। शब्दादि सर्वमेवावगत्याभासफलावसानप्रत्ययप्रमितं सिद्धं स्यात्। न चात्मव्यतिरिक्तोऽपी
श्वरस्सर्वज्ञः स आत्मप्रेरकः स्यादिति चेत्तत्राह अवगतिश्चेदिति॥ अवगतिश्चेदात्मनोऽनन्यस्यात्सोऽप्यात्मैव न संहतः स्यार्थत्वा

षि२

हा६

ट५

घ६

तोप २

त्रा २

न्यपरार्थः॥ लौकिकदृष्ट्या तु नो न्यस्येश्वरस्य स्वाभाविकी चेद्दृग्गतिरिष्टा सोऽप्यस्माकमात्मैव अयमात्मा ब्रह्मेति श्रुतेः अतः
न कश्चिद्दोषः स्यादिति प्रेरकौ स्मितिरित्यर्थः॥ चैतन्याश्रयो देहादिरेवास्ते संगीकारात् कथं न स्यात्संहतत्वमिति मतांतरमाशंक्या
ह नचेति। नच देहेंद्रियाणां स्वार्थतामङ्गीकुर्मो वगत्यवसानप्रत्यक्षापेक्षसिद्धिदर्शनात्। यथा स्वगतेन प्रकारेणैव सिद्धि
न प्रकाशनेन तथा देहधर्मत्वे दृग्गतिर्न तथा देहो वगम्येत [illegible] अयगम्यते च अतो देहो नात्मा वगत्यपेक्षोऽस्य सिद्ध
त्वान्न घटादिवदित्यर्थः। देहस्य मनुष्योऽहं ममाहं जानामीति स्वे चैतन्ये प्रत्यक्षविरोधाद्दृग्गत्यपेक्षोऽस्ति सिद्धत्वमसिद्धमिति। तं शंक
ते नन्विति। ननु देहस्यावगतौ न कश्चित्प्रत्यक्षादिप्रमाणांतरमपेक्ष्यते। तत्रार्धमंगीकृत्यार्थं दूषयति बाढमिति॥ बाढं जाग्रद्दे
स्थानुभूतसुप्तयोस्तु देहस्यापि प्रत्यक्षादिप्रमाणापेक्षयैव सिद्धिः। यथा जडस्य देहस्य प्रत्यक्षाद्यपेक्षयैव सिद्धिः न था जडत्वा
विशेषादिंद्रियाणां तद्रूपेक्ष्ये वा सिद्धिरित्याह तथेति। तथैवेंद्रियाणां। किं च देहादिरनात्मा भौतिकत्वादुभयसंप्रतिपन्नघटा
दिवदित्याह। बाह्या एवेति। बाह्या एव हि शब्दाद्यो देहाद्याकारपरिणता इति। किंच शब्दादीनां प्रत्यक्षादिसापेक्षसिद्धत्वात्तेषामे
व देहाद्याकारेण परिणतानां न स्वपेक्षसिद्धत्वं दुर्वारमित्याह। प्रत्यक्षादिति॥ प्रत्यक्षादिप्रमाणापेक्षयैव सिद्धिः ननु सिद्धरूपस्य निरिच्छ
ते न सा प्रत्यक्षाद्यपेक्षा तत्राह। सिद्धिरिति॥ चेति। सा चासिद्धिरिति प्रमाणानां फलमवगतिर्नयोचाम। ननु स्वरूपकिं वहेहादिका रूपशिणाने
पुरुषेषु अवगतिरुत्पद्यते। न त्वागमापायधर्मास्तत्साक्षिकेत्याह। सा चेति। सा चावगतिः कूटस्थस्वयंसिद्धात्मज्योतिः स्वरूपेति न
क्रियापदानुषंगयोः तत्को [illegible] स प्रकारः कूटस्थचेद्दृग्गतिस्तर्हि फलत्वं न स्यादित्याह न तावदिति चोदकाभिप्रायोऽहेति॥

चे ३

न ३

२२

२२

57

अत्राह चोदको ऽवगतिः प्रमाणानां फलं कूटस्थनित्यात्मज्योतिःस्वरूपा चेति विप्रतिषिद्धं। कूपाकाशकार्यत्ववदौपचारिकं कार्यत्व-
मुपेत्य फलत्वं दर्शयति इत्युक्तं यन्निरस्तं। इत्युक्तवंतमाह। अप्रतिषिद्धं कथं तर्हि अवगतेः फलत्वं तस्या उपचाराद् अवगतिर्हि
कूटस्थनित्यापि सती प्रत्यक्षादिप्रत्ययानिबद्धत्वेन तेन दृश्यते प्रत्यक्षादिप्रत्ययस्यानित्यत्वेनानित्यवत् भातीति तेन प्रमाणानां फल-
मित्युपचर्यते॥ न पुनः स्वतः फलत्वमवगतेः प्रमातृत्वं कर्तृत्वं फलत्वं च कूटस्थावगतिस्वरूपे कल्पनामात्रमित्युपपादयाम्। अ-
नाद्यात्मस्य द्वैतस्यापि कल्पितत्वं चोद्यमुखेन दर्शयति यद्येवमिति॥ यद्येवं कूटस्थनित्यावगतिरात्मज्योतिःस्वरूपैव स्या-
त्कथं सिद्धात्मनि प्रमाणानि स्युः प्रत्यक्षादीनामद्वैतेन संहतत्वकारित्वात् इत्यर्थः॥ अवगतिविषयस्याचेतनत्वाद् द्वैतस्य संहत्यकारि-
त्वेन परार्थत्वेन शुक्तिरजतादिवन्मिथ्यात्वोपसिद्धिरित्ययुक्तं पुरुषचोदस्यापि जडस्य सत्त्वरजस्तमसात्मकस्य प्रकृतिरूपे-
ण परार्थस्यैव सांख्यैः सत्यत्वाभ्युपगमादित्याशंक्याह। येनेति॥ येन च सुखदुःखमोहहेतुप्रत्ययावगतरूपेण पार-
र्थ्यं तेनैव स्वरूपेणात्मनो ऽस्तित्वं नान्येन रूपान्तरेणातो नास्तित्वमेव परमार्थतः॥ सुखदुःखमोहस्य च हेतवो ये
प्रत्यया बुद्धिपरिणामाः तैरवगतेन रूपेण जडं परार्थ्यं तेनैव स्वरूपेण तस्यानात्मनो दृश्यस्य द्रष्टारं प्रत्यस्तित्वं नान्ये-
नातीन्द्रियेण परपरिकल्पितेन अभ्युद्भवाचित्स्वरूपं तत्र जगत्कारणमित्यादिना रूपेणास्तित्वं नानाभ्यागमविरो-
धाद्द्वैतेन द्वैतस्य वस्तुतो नास्तित्वमेवाद्वैतत्वात्प्रमाद्वैतवादित्यर्थः। किंच यत इतः द्वैतस्तत्त्वतो नावगतिव्यतिरेकेणास्ति द्रष्टव्य-
त्वाद्रज्जुसर्पवदित्याह यथा हीति॥ यथा हि लोके रज्जुसर्पमरुमरीचिकोदकादीनां तदवगतिव्यतिरेकेणाभावो दृष्टः

एवं जाग्रत्स्वप्नद्वैतेन भावस्यापि तदवगतिव्यतिरेकेणाभावो द्रष्टुं युक्तः किंच यथा द्वैतं मिथ्येति तन्मते प्रति[illegible]भासते तथैव
कूटस्थनिस्सत्यमद्वितीयत्वं चावगतेर्मम प्रतिभाति स्वप्रकाशत्वादनवच्छिन्नत्वादव्यभिचारित्वाच्चेत्याह। एवमेवेति॥ एव
वेति॥ एवमेवावगतेरात्मज्योतिषः नैरंतर्यभावात्कूटस्थनित्यता अद्वैतभावस्स्युश्च सर्वप्रत्ययभेदव्यभिचारात्। किंच विमत
मसत्यं व्यभिचारित्वात्स्वप्नवदित्याह सम प्रत्ययेति॥ प्रत्ययभेदा स्वजगतिं व्यभिचरंति यथा स्वप्ने नीलपीताद्याकारभेदरू
पाः प्रत्ययास्तदवगतिं व्यभिचरंतः परमार्थतो न संतीत्युच्यंते॥ एवं जाग्रत्यपि नीलपीतादिप्रत्ययभेदाः तानेवावगतिं व्यभिच
रंतोऽसत्यरूपता भवितुमर्हंति। यद्वैतस्य मिथ्यात्वे हेतुत्वं व्यभिचारित्वं च कारणमुक्तं तदवगतेरपि तुल्यमिति तन्मिथ्यात्वप्र
सक्तिरित्याशंक्याह तस्याश्चेति। तस्याश्चावगतेरन्योऽवगंता नास्तीति तस्येन रूपेण स्वयमादातुं हातुं वा शक्यते। स्वेन स्वस्य
कर्मकर्तृत्वविरोधेन हानोपादानयोरयोगश्चेदन्येनैव तर्हि स्वस्य हानोपादाने स्यातां नाविरोधादित्याशंक्याह अन्यस्याति॥
अन्यस्य चाभावात्तथैवेति॥ अद्वितीयस्य प्रत्यगात्मनस्सच्चिदानंदैकतानस्य परमार्थत्वं द्वैतप्रपंचस्य मिथ्यात्वमित्येव
शिष्येणोक्ते गुरुणा चाभ्यनुज्ञाते विपरीतप्रभा कुत इत्याशंक्याह एषाविद्येति॥ विद्याभावे व्यवच्छेत्तुं विशिनष्टि यन्निमित्त इति॥
यन्निमित्तस्संसारः जाग्रत्स्वप्नलक्षणः अविद्यायास्तर्हि कुतो निवृत्तिरित्याशंक्याह॥ तस्या इति। तस्याः अविद्यायाः निवर्तकावि
द्यासा च विद्यात्वयोक्तप्रकारेण संवृत्ते निरस्तकरणस्त्वमित्याह इत्येवमिति॥ इत्येवं त्वमभयं प्राप्तोऽसि। विद्योत्पत्तेरूर्ध्वमभ
यप्राप्तिं व्यक्तीकरोति नात इति॥ नातः परं जाग्रत्स्वप्नदुःखमनुभविष्यसि संसारदुःखान्मुक्तोऽसीति। शिष्योऽपि यथोक्तप्रका
वद्बहीत्याह न तत्संसारमनुज्ञो नामीति ओमिति॥ ओमिति॥ ॥ओमितिअवगतिप्रकरणं टीकासहितं समाप्तं॥ ॥७॥

२३

मि

२३

५९